॥१॥ श्रीसहजानंदाय नमो नमः॥ अथ कविर्मंदिराद्विवर्णनमुपक्रमते विचकास्तीति भुवि क्षितौ जनानां निर्वाणो
मोक्षः निर्वाणो निर्वृतौ मोक्षे विनाशे गतमज्जने इति यादवः तस्य विधिक्रिया चिकीर्षया तपसो धर्मस्य तनूजतां
पुत्रताम् इयुषा प्राप्तवता हरिणा श्रीहरिणा वृत्तालयतः गुर्जरदेशस्थ वृत्तालयात् अक्ष्येपुरवित्रे देशे विधापितं का
रितं रमणीयं चारु यन्मंदिरं श्रीलक्ष्मीनारायणालयं विचकास्ति विभाति॥१॥ पुर्वेति यत्र यस्मिन्मंदिरे विलसंतः

विचकास्ति तपस्तनूजतां जननिर्वाणविधिक्रियेयुषा॥ हरिणा रमणीयमंदिरं भुवि वृत्तालयतो विधापितम्॥१
पुरु भाति लसन्महोपलैर्वरसोपानपरंपरा यथा॥ रचिताक्षरधामपद्धतिर्विमला यत्र विचित्रभक्तिभिः॥२॥ व
रुचारुगवाक्षनिःसृतैर्वरधूपैर्निवहस्सुरुश्रियम्॥ अचिरांशुमहोविराजितैरुदभ्रैरुपमेयतां गतैः॥३॥

शोभमाना ये महोपला महामणयस्तैः विचित्रभक्तिभिर्नानाविधरचनाभिः रचिता निर्मिता वराणि श्रेष्ठानि सो
पानवरोहणानि तेषां परंपरा पंक्तिः विमला शुद्धा अक्षरधाम्नः पद्धतिर्मार्ग इव पुरु भूरि यथा तथा भाति रा
जति॥२॥ वरुचिति वरुचारुः सुवर्णस्य चारवो रम्या ये गवाक्षाः जालानि तेभ्यो निःसृतैर्निर्गतैः अत एव अचिरं॥
अल्पकालं अंशवः किरणा यस्याः सा अचिरांशुर्विद्युत् तस्या महसा तेजसा विराजितैर्भासितैः चलंतिया ॥१॥

न्त्रभाणितैः उपमेयतां तुल्यतां गतैः प्राप्तैः वरधूपैः श्रेष्ठधूपैः यत्क्षितिनिवेशः यन्मंदिरं उरुश्रियमतिशोभां निवह॰
ति दधाति॥३॥ अवलोक्येति असमेन तुल्येन भवती सनमसन्निभं सकलमंदिरशोभिसर्थः अस्य पदविग्रह
त्वान्नि समासोऽयम् अत एवावलोकनेन निरीक्षणेनोद्वितं योग्यं यत् मंदिरं अवलोक्य दृष्ट्वा विस्मितैस्तन्नमणी
यत्वातिशयविलोकनादाश्चर्याविष्टैरिसर्थः जनवारैः जनानां वाराः समूहास्तैः शोभिसितजनस्य कारुजनस्य स

अवलोक्य विलोकनोचितं जनवारैर्यदनन्यसन्निभम्॥ अवबुध्यत एव विस्मितैः सकलं शोभि सितजनस्य कौशु
लम्॥४॥ यदुपासे च यदीक्षणक्षणं महसा सर्वदिगंततलं विना॥ अवभासयते दिशोऽखिलास्तुहिनक्ष्माधरकांति
निर्मुना॥५॥ विषमेक्षणचारुवर्ष्मणा समतां समतां भूतिवलक्षरोचिषा॥ अधिरोहि भिरुद्धसत्रिभिः त्रि
स्वरैर्मनुतरैर्यदुच्चकैः॥६॥ कलसमग्रं कौशलं नैपुण्यं अवबुध्यते ज्ञायत एव॥४॥ यदुपासेति ईक्षणानां ने
त्राणां क्षणं उत्सवो यस्मात्तत् तथोक्तं यत् मंदिरं सर्वे ये दिगंताः ककुबंतास्तान् अवलेव्य ते आश्रयते इति
तथोक्तेन सर्वदिगंतव्यापिने सर्थः तुहिनक्ष्माधरो हिमाचलः तस्य या कांतिस्तां जयतीति जमस्तेन तथोक्तेन म
हसा तेजसा यदुपासे च कीर्ण्येव अखिलाः समग्राः दिशः कर्मभूताः अवभासयते प्रकाशयते॥५॥ विषमेति भूसा

भस्मनावलक्ष्यं शुभ्रं रोचिः कांतिर्यस्य तेन भूतिर्भस्म निसंपदी स्मरः विषमाणि असमानि त्रीणि त्रियाच
नुई क्षणानि नेत्राणि यस्य स विषमेक्षणः त्रिवस्तस्य चारुरम्यं पक्ष्मपर्यंक कलेवरं तेन समतां सदृशतां अधिरो
हिभिः प्राप्नुवद्भिः उच्चैरुन्नतैः अप्रमयसर्वेनामानामकच्छाकुटैरिस्सुच्चैः गाहसायसटैः प्राकृप्रकच्च मं
जुलरै रतिरमणीयैः त्रिभिः शिखरैः सानुभिः उल्लसत् राजत् आसीति शेषः ॥ ६ ॥ अतिचारुतयेति यत्मंदि
रम् अतिचारुतयातिरम्यतया विनिर्मितः रचितैः विलसं तच्छ्रुरवोरम्या विचित्राः केतवो ध्वजा येषां तैस्तथो

अतिचारुतयाविनिर्मितैः पुरतः षड्भिरुपस्कृतं स्थितैः ॥ कटकैरिवयद्विमानकैर्विलसच्चारु विचित्रकेतुभिः
७ ॥ कमनीयतराग्रगामिना विमलाष्टापद निर्मितेनयत् ॥ महताकलशेन राजते हरिदश्वेनयथाहिमा
चलः ॥ ८ ॥ कैः पुरतः स्थितैरग्रेवर्त्तमानैः षड्भिः कटकैः शिखरैः विमानकैरिवनुपस्कृतं विभासितं ॥ अ
स्ति ॥ ७ ॥ कमनीयेति यत्मंदिरं कमनीयतरं रमणीयतरं यदग्रमुपरितनभागस्तं गच्छति प्राप्नोतीति तथोक्ते
नमध्यशिखरे परिस्थापितेनेत्यर्थः विमलं निर्मलं यदष्टापदं स्वर्णं तेन निर्मितो रचितस्तेनतथोक्तेनमहता अ
नल्पेन कलशेन कुंभेन हरितो हरिद्वर्णा अश्वा हयायस्य सतथोक्तः सूर्यस्तेन हिमाचलो हिमगिरिर्यथा राजते शोभ

यदितियत्मंदिरं अधीरं चपलोयः समीरणो वायुस्तेन ईरितैः कंपितैः अतएवतरलैश्चंचलैः नवानि नूतना
नियानि चीनांबराणि वस्त्रविशेषास्तैः कल्पितानि निर्मितायै ध्वजास्तैः भुविभूमौ धर्मस्य वेदोदितस्य स्ववर्णाश्र
मव्यवस्थावस्थितस्य चत्वस्य विद्विषस्तस्प्रतिकूलवर्त्तनत्वाद्वैरिणः अनुभाजो देहधारिणः मुहुः पुनः पुनः तर्ज
यत् भर्त्सयद्विवेसुस्पष्टा ॥ ९ ॥ परितस्रेति ललितं यत् रम्यं यत्मंदिरं उत्कचवासरेषु जन्माष्टमी रामनवम्यादि

यदधीरसमीरणेरितैर्नवचीनांबरकल्पितध्वजैः ॥ तरलैरिवतर्जयन्मुहुस्तनुभाजो भुवि धर्मविद्विषः ॥ ९ ॥
परितस्महिरण्यकेतुभिर्निहितैरुत्सववासरेषुयत् ॥ अनुगच्छति विस्फुरत्प्रभैर्ललितं मेरुमहीधरश्रियम् ॥ १० ॥
मरुदीरितकेतुवाससां ज्वलदुल्कामरीचिस्फुटोपमैः ॥ क्रियते किरणैर्विसृत्वरैर्भ्रामायामवशोर्ध्वगत्वरैः ॥ ११

उत्सवदिनेषु निहितैः आरोपितैः विशेषेणस्फुरत्सः प्रकाशमानाः प्रभाः कांतयो येषां तैस्तथोक्तैः परित
तं शोभितयत् हिरण्यकनकं तस्य केतुभिर्ध्वजैः मेरुमहीधरस्य मेरुपर्वतस्य श्रियं शोभां अनुगच्छति अनुक
रोति ॥ १० ॥ मरुदितिज्वलंती प्रकाशमानायाउल्काविद्युत् तस्या मरीचयः किरणास्तैः स्फुटास्पष्टा उपमा
येषां तैस्तथोक्तैः ऊर्ध्वगत्वरैरूर्ध्वगमनशीलैः विसृत्वरैः प्रसारिभिः मरुतावायुना ईरितानि कंपितानिया

निकेतुवासांसि ध्वजवस्त्राणि तेषां किरणैः रश्मिभिः भृशमसंतं आयामो दैर्घ्यं क्रियते इव हृत इव स्वतो दी 
र्घा अपि ध्वजाः स्वकांतिप्रसाराद्दीर्घतमा इव लक्ष्यंते इति भावः ॥ ११ ॥ विलसद्वलभीभिरिति रुचिरं रम्यं य
त् मंदिरं चंद्रमरीचयश्चंद्रकिरणास्तद्वत्कांतयो यासां ताभिस्तथोक्ताभिः विलसंत्यः शोभमाना या वलभ्यो
गोपानस्यस्ताभिरन्वितं युक्तं गोपानसी तु वलभीच्छादने वक्रदारुणी समरः पुरतोऽग्रे विमलच्छविनिर्मल

विलसद्वलभीभिरन्वितं परितश्चंद्रमरीचिकांतिभिः ॥ विमलच्छवि चंद्रशालया पुरतो यत्र रुचिरं विरोचते ॥ १२ ॥
स्फटिकप्रतिमेषु केतवः शिखरेषु प्रतिबिंबतां गतैः ॥ नाकुला इव यत्र चंचला विलसंति त्रिदशापगाजले ॥
१३ ॥ स्फुटसंपरितो विराजते यदगारैः समपंक्तिसंस्थितैः ॥ अतिगोपतिचारुवेश्मभिर्भृशमुच्चैः पुरुसंपदांपदैः
१४ ॥ कांतिर्यां चंद्रशाला शिरोगृहं चंद्रशाला शिरोगृहमित्यमरः तया विरोचते भासते ॥ १२ ॥ स्फटिकप्रति
मेष्विति यत्र मंदिरे स्फटिकैः शुभ्रसलिलैः प्रतिमा उपमा येषां तानि तथोक्तानि तेषु शिखरेषु प्रतिबिंबतां ग
ताः प्राप्ताः चंचलाः केतवो ध्वजाः त्रिदशानां देवानां आपगा नदी तस्या जले चंचलाः नाकुला मीना इव विलसं
ति विभांति ॥ १३ ॥ आदिक्रियाकुलकमाह स्फुटतरामिति यत् मंदिरं समा एकरूपा याः पंक्तयो राजयस्ता 

भिः संस्थितानि तैः अतिक्रांतानि स्वशोभया उल्लंघितानि गोपतेरिंद्रस्य चारूणि रमणीयानि वेश्मानि गृहा
णि यैस्तानि तथोक्तानि इंद्रसदनादप्यतिरम्याणीत्यर्थः तैः भृशमसंतम् उच्चैरुन्नतैः पुरूणां बहुलानां संपदः
समृद्धयस्तासां पदैः स्थानैः अगारैः सदनैः परितः समंतात् स्फुटतरामत्यर्थं विराजते शोभते ॥ १४ ॥ सतुलैरिति
स्फुटैः प्रकाशमानैः तुलाउपरिस्थाप्यदार्वाधारभूतानि स्तंभाग्रपीठानि तैः सह वर्तमानानि तैस्तथोक्तैरपि
न संति तुल्यानि येषु तानि तथोक्तैस्तद्वर्जितैरिति विरोधः अनुपमैरिति परिहारः तुलासाम्ये स्तंभपीठे इत्सुभ

सतुलैरतुलैरपि स्फुटैर्वरजालैश्च विजालकैरपि ॥ अपि चित्रयुतैरचित्रकैः सवितानैरवितानकैरपि ॥ १५ ॥

यत्रापि वैजयंती विगताः जाला भद्राणि येषां तानि विजालकानि शोभाद्विभावेति कपृशालामद्वेतरुस्कंधे
शाखागारैकदेशयोरिति विश्वः तैर्विजालकैरपि वरजालैर्बहुभद्रैरिति विरोधः विजालैर्विस्तृतैः पृथु
भिरितियावद्धिसविरोधः विशालं पृथुलं महदित्यमरः वेः शालच्छंकटचावितिशालक्वप्रत्ययः न संति चित्रा
णि आलेख्यानि येषु तानि तथोक्तैरपि चित्रयुतैरिति विरोधः आश्चर्ययुक्तैरिति परिहारः आश्चर्यालेख्य
योश्चित्रमित्युभयत्राप्यमरः सवितानैरुल्लोचसहितैरपि अवितानकैस्तद्रहितैरिति विरोधः अभ्रमैरिति

हरिसं · परिहारः समस्तवस्तुसमूहैरित्यर्थः अस्त्री वितानमुल्लोचो वितानं त्रिषु तुच्छकमित्युभयत्राप्यमरः अपि सर्ग·१८
॥ ध ॥ र्थं सर्वत्र विरोधे विरुद्धवदाभासा द्विरोधोलंकारः विरोधः सोविरोधेपि विरुद्धत्वेन यद्वचः इति काव्यप्रका
शलक्षणात् ॥ १५ ॥ स्थितचंद्रकिरणमिति वलभीषु वक्रदारुच्छादनेषु क्षणमेव क्षणमात्रं असंतसंयोगे द्वि
तीया स्थितायेचंद्रकिरणोमेचकचंतोमयूराःस्तेषां समो चंद्रकमेचका वित्यमरः लंबिभिर्लंबमानैः कलाप
कैर्बर्हैः कलापोभूषणेबर्हेइत्यमरः हरितोपलवत् भास्वराणितैः तृणैर्युतैः युक्तैः पटलांतैर्नीध्रैरिवराजि

स्थितचंद्रकिरणांकलापकैर्वलभीषु क्षणमेव लंबिभिः ॥ हरितोपलभास्वरैस्तृणैः पटलांतैरिवराजितैर्युतैः
१६ ॥ निकरैः परितः प्रसारिभिः शुकनीलोपलदेहलीत्विषाम् ॥ उपपादितगोमुखभ्रमैः सदलिंदेषुदधे
स्तुल्यताम् ॥ १७ ॥
तैः शोभमानैः वलीकनीध्रेपटलप्रांतेथपटलंछदिरित्यमरः अतएव हरितत्वं लंबना
दिगुणक्रियानिमित्ता पटलांतैरिवेति जातिस्वरूपोत्प्रेक्षा ॥ १६ ॥ निकरैरितिपरितः समंतात् प्रसारिभि
र्व्याप्तैः शुकवत् नीलायेउपलामणयो मरकतानीत्यर्थः तेषां सकृताः तथाभूतायादेहल्यो गृहद्वारस्थारवा
धारदारूणि गृहावग्रहणी देहलीत्यमरः तासांत्विषः कांतयस्तासां निकरैः समूहैः करणैः अतुल्यतां ॥ ध ॥

असाम्यतां दधत्कः अलिंदेषु द्वारबहिर्भागेषु प्रघाणप्रघणालिंदाबहिर्द्वारप्रकोष्ठके इत्यमरः उपपादितः संपा
दितः कृतः इति यावत् गोमुखस्य विलेपनस्य भ्रमोभ्रांतिर्यैस्तानि तथोक्तैः गोमुखं कुटिलाकारे वाद्यभांडे विले
पन इति विश्वः भ्रांतिमदलंकारः कविसंमतसादृश्याद्रूपाद्वस्त्वंतरसमनिर्यत्र सभ्रांतिमानितिलक्षणात् ॥ १७ ॥ त्रिगि
कं च मुखैरिति अतिचारुरतिरम्यो यश्चतुष्कस्तत्र संस्थितैः रूपविशेषैः कलनिक्वणादिभिर्मधुरस्वरैः त्रिगितिकं गामयूर

त्रिगितिकं च मुखैर्विनादितैः कलनिक्वाणादिभिरंडजव्रजैः ॥ अतिचारुचतुष्कसंस्थितैर्वरचामीकरजालराजितैः ॥ १८ ॥
रमणीयगवाक्षसंयुतोनवमुक्ताफलशुभ्रमंडपः ॥ अगतस्तुलनां विराजते रुचिरस्तंभयुतोयदग्रतः ॥ १९ ॥
त्रिदशाधिपचारुकार्मुकप्रतिमानं त्रिभिरुच्छ्रितैर्गतैः ॥ प्रतिकक्ष्यमुखैर्विभासितो विलसच्चित्रकपाटतोरणैः ॥ २०

मुखानि मुख्यायेषां तानि तथोक्तैः अंडजानां पक्षिणां व्रजैः समूहैः विनादितैः वरं श्रेष्ठं यत् चामीकरं स्वर्णं तत
स्यजालानि गवाक्षास्तैः राजितैः शोभमानैः ॥ १८ ॥ रमणीयेति यदग्रतः यस्य मंदिरस्याग्रे रमणीया रम्या गवाक्षा
जालानि तैः संयुतो युक्तः रुचिराः रम्या ये स्तंभास्तैर्युतः तुलनां साम्यं अगतः अप्राप्तः सर्वोत्तरश्रीमानित्यर्थः नव
नवीनं यन्मुक्ताफलं तद्वत् शुभ्रो धवलो यो मंडपः सविराजते विरोचते ॥ १९ ॥ त्रिदशेति त्रिदशानां देवानामधि

॥५॥ पः इंदुः तस्य चारु रम्यं यत् कार्मुकं धनुः तस्य प्रतिमानं उपमानं गतैः प्राप्तैः मस्तकद्विचित्रवर्णैः रित्यर्थः विलसं
ति चित्राणि नानाविधानि कपोततोरणानि येषु तैः उच्छ्रितैः उच्चैः त्रिभिः अतिक्रमाणि अतिरम्याणि यानि
मुखानि द्वाराणि तैः विभासितः शोभमानो मंडपो विराजते ॥ ३०॥ वक्ररूपेति यत्र मंडपे पुरुः अधिकोयः मसताभ्रमः
मसत्वभ्रांतिस्तं विदधद्भिः कुर्वद्भिः वक्रपुरुरूपं येषां तानि विचित्राणि नानाविधानि यानि चित्रकालि
आलेख्यानि तैः जनचित्रीकरणात् जनानामाश्चर्यविधानात् हेतोः नितरामसंतं यथार्थता अर्थस्य चित्रत्वाद्

वक्ररूपविचित्रचित्रकैर्जनचित्रीकरणाद्यथार्थता ॥ नितरांखलुयत्र लंभिता विदधद्भिः पुरुमसताभ्रमम् ॥
३१॥ अधितिष्ठतियत्रमंदिरंवरपाठीनवपुर्विनिर्मितम् ॥ प्रलयांबुनिधौमहीयसिप्रथिताम्नायगणाविता
हरिः ॥ ३२॥ र्थस्य योग्यं यथार्थं अव्ययं विभक्तिसमीपेसादिना यथार्थे ऽव्ययीभावः तस्य भावस्तत्ता चित्रना
म्नः सार्थकत्वं लंभिता प्रापिता कर्मणि क्तः खलु निश्चितम् ॥ ३१॥ अधितिष्ठतीति यत्र यस्मिन् मंडपे स्य दक्षिण॰
दिग्भागस्य श्चिमभागे विनिर्मितं रचितं मंदिरं महीयसि महत्तरे प्रलयांबुनिधौ प्रलयसागरे प्रथितो विख्या॰
तो य आम्नायगणो वेदगणस्तस्य अविता रक्षकः वरं श्रेष्ठं पाठीनवपुर्मत्स्यकलेवरं यस्य स तथोक्तः हरिः ॥५॥

अधितिष्ठति मंदिरे तिष्ठतीत्यर्थः अधिशीङ्स्थासां कर्मेति कर्मत्वम् ॥ ३२॥ तं विद्विनष्टि अनयद्भिति उदारो
महान् विक्रमः पराक्रमो यस्य स तथोक्तः यो मनुष्यमूर्त्तिः हरिः भुवनानि अभितापयतीति तं तथोक्तं सकलभुव
नस्य बाधाविधायिनमित्यर्थः अनेन दुर्जयो दुःखेनाजितेतुम् अशक्यस्तं भीमं भयंकरं मदेन उद्धतमनसं दनुजंदा
नवं रंकुपतिः मृगपतिः सिंहः करिणां वारणानिव विगताः असवः प्राणा यस्य स व्यसुः तस्य भावस्तत्ता तां अ

अनयद्भुवनाभितापिनं दनुजं भीममुदारविक्रमः ॥ व्यसुतामिवयोमनुदुर्जयं करिणं रंकुपतिर्मदोद्धतम् ॥ ३३॥
निवसत्यतिरम्यमंदिरे मिहिरोऽत्र स्फुटवेदमंत्रतः ॥ महितः सततं महीसुरैस्तिमिरव्रातवितंडनक्षमः ॥ ३४॥
मदनीयपरिस्फुरद्द्युतिप्रकरद्योतितलब्धुराहतिः ॥ सुरसद्मकरस्त्रयीमयो निखिलप्राणभृदंबकेश्वरः ॥ ३५

नयतु अप्रापयत् तं महनदित्यर्थः ॥ ३३॥ निवसतीति अत्र अस्मिन् मंडपस्य दक्षिणदिग्भागस्य पूर्वभागे वि
निर्मितमिति शेषः अतिरम्यमतिचारु यत् मंदिरं तस्मिन् तिमिरस्य अंधकारस्य व्रातः समूहस्तस्य वितंडनं भे
दनं तत्र क्षमः समर्थः महीसुरैर्विप्रैः स्फुटवेदमंत्रैः सततं निरंतरं महितः पूजितः मह पूजायां अस्मात् कर्म
णि क्तः मिहिरः सूर्यो निवसति प्रतिमारूपेण तिष्ठतीत्यर्थः ॥ ३४॥ तं विद्विनष्टि युग्मेन महनीयेति महनी॰

॥ ६ ॥ यापूज्यापरिस्फुरंतीसर्वतः प्रसरंतीयाद्युतिः कांतिस्तस्याः प्रकरः समूहः तेनद्योतिताभासितावंधुरारम्या
आकृतिर्मूर्तिर्यस्यसतथोक्तः स्फुरणानां देवानांनर्मकरः सुखकारकः प्रचुरात्रयीरूपवपुः सामेतिवेदत्रि
कंस्वरूपप्रतिपादकस्तेनत्रयीमयः वेदप्रतिपाद्यस्वरूपइत्यर्थः प्राचुर्येमयट् निखिलाः समग्रायेप्राण
भृतः प्राणधारिणः तेषामंबुकानिनेत्राणितेषामीश्वरोऽधिष्टाताऋषिभिरितिषष्टिसहस्रेणसंमितैः प
मितैः षष्टिसहस्रसंख्यैरित्यर्थः परिवद्धः संपुटीकृताञ्जलयः प्राणयोयैस्तैस्तथोक्तास्तैः पुरतः सूर्यस्याग्रतः
ऋषिभिः पुरतोभिगत्वरैः सततंषष्टिसहस्रसंमितैः ॥ परिवद्धप्राणैर्मुदान्वितैः श्रुतिभिर्वामनवर्ष्मभिः स्तुतः
२६ ॥ कमठाकृतिरस्यमंदिरेवसतिक्षीरपयोनिधौहरिः ॥ विपुलेनिजपृष्टकेविभुर्निदधेयः किलमंदराचल
म् ॥ २७ ॥ अभिगत्वरैर्गमनशीलैः वामनानिकुत्सानिवर्ष्माणिवपूंषियेषांतैस्तथोक्तास्तैः मुदान्वितैः
ऋषिभिर्वालखिल्यसंज्ञैः कृत्स्नैर्भिः श्रुतिभिर्वेदैः सततमनंतरमुपस्कृतः ईडितः ॥ २६ ॥ कमठाकृतिरितिअस्यमं
दिरेअमरस्मिन्मंडपस्यपूर्वदिग्द्वाराद्दक्षिणभागेनिर्मितंयन्मंदिरंतस्मिन् कमठस्यकूर्मस्याकृतिरिवाकृति
र्यस्यसतथोक्तः हरिः वसतिसकथंभूतः विभुः समर्थः यः कूर्मरूपोहरिः क्षीरपयोनिधौक्षीरसागरेविपु ॥ ६ ॥

लेविस्तीर्णेनिजः स्वकीयोयः पृष्टकस्तस्मिन् मंदराचलंमंदरगिरिंनिदधोदधारकिल ॥ २७ ॥ शायितइति
नवनीतंहयंगवीनंतद्वत्कोमलेमृदुलेभुजगाधीश्वरः शेषस्सएवचारुः तल्पकः शय्यातस्मिन्शायितः
प्रणतायेअमरास्तेषांनर्मकारकः सुखकारकः हरिः शेषशायीअस्मिन्मंडपस्यपूर्वदिग्द्वारादुत्तर
भागेनिर्मितंयत्सद्मंदिरंतस्मिन् निवसति ॥ २८ ॥ तदितितस्यशेषस्ययेअनेकेबहवः स्फुटभोगाः फण
शायितोनवनीतकोमलेभुजगाधीश्वरचारुतल्पके ॥ प्रणतामरनर्मकारकोनिवसत्यस्यसुमंदिरेहरिः ॥ २९ ॥
तदनेकस्फुटभोगमंडलैरुचिरैरातपवारणैरिव ॥ मधुराद्यवयवोन्नताकृतिः स्फुरवैरिक्षयणोविराजितः ॥ ३० ॥ मृ
दुदस्तनवांकुरावृतेललितक्षौमविलीनमेखले ॥ सरसीप्रभवातिमंजुलेकमलांकेकलयन्पदद्वये ॥ ३१ ॥
स्तेषांमंडलानितैः भोगः फणस्तथाद्रिभूतावहेश्चफणकाययोरित्यमरः रुचिरैरम्यैः आतपवारणैः छत्रै
रिवविराजितः मधुराद्यवयवाः अंगानियस्याः सातथाभूताउन्नताकृतिर्यस्यसः स्फुरवैरिणांक्षयणोवि
नाशकः निवसतीतिसर्वत्रसंबंधः ॥ ३० ॥ मृद्विति मृदुकोमलोयोहस्तोताबेवनवांकुरेनवपल्लवेताभ्यामा
वृतआच्छादितस्तस्मिन्ललितंरम्यंयत्क्षौमंकौशेयंतस्मिन्विलीनागुप्तामेखलायस्यसतस्मिन् विते

हरिसं · ॥ ७ ॥ चरणयुगेनाविपदयोरितिमार्दवान्मोखलानस्य नृणांक्षमत्वं लक्ष्यते कमलांके रमोत्संगे सरसीप्रभवं सरोजं तत्समा सर्ग · १८
दृश्यतिमंजुले कोमलेपदद्वये अंघ्रियुगे कलयन् दधत् ॥ ५० ॥ विधिनेतिनिजास्वकीयायाप्रतारितानाभिरू
रुहः प्रभवोयस्यतत्तथाभूतमंभोरुहं पद्यं तदेव विष्टरं आसनं तस्मिन् स्थितिमुपवेशनं ईयुषाप्राप्तवता विधि
नात्रक्रमेणजगतः उत्पत्तिस्तस्याविधिक्रियाचिकीर्षा तयाहेतुभूतया विधिनावेदोक्तप्रकारेण प्रणयेनचविधिं

विधिनाविधिनाविधित्सितितोजगदुत्पत्तिविधिक्रियेयुषा ॥ प्रणयेननिजप्रतारिताप्रभवांभोरुहविष्टरस्थितिम् ॥ ५१ ॥
मोरवनायनिकनिर्मलात्मनोवीक्षणैर्भृगुमुखान् ऋषिव्रजान् ॥ पावनैर्विदधदसनुग्रहं सोयदर्शनरतान् कृतानतीन् ॥ ५२ ॥
जहताभुजंगपतिनाविरोधितां विनतात्मजेन हरिदीश्वरार्थितेः ॥ महितः कृतांजलिपुटेन धीमताप्रतिवासरंनतिविशेष
णांजलिना ॥ ५३ ॥ तिनः ध्यातः ॥ ५१ ॥ मोरवेतिरूक्वनायनं प्रच्छंतीतिमोरवनायिनिकाः पृच्छतो रूस्नातादिमंत्रउपसंख्या
नमितिगकृत् अनुसूपतिकादिलात्तुभयपदवृद्धितथाभूताशूते निर्मलात्मनो विशुद्धमनसस्तान स्वीयं नितंयतद
र्शनंतत्ररताः तान् कृत आनतयोनमस्कारा यैस्ते तथोक्तान् भृगुमुखान् भृग्वादीन् ऋषिव्रजान् ऋषिगणान्
पावनैः शोधकैः वीक्षणैरवलोकनैः असमनुग्रहं विदधत् कुर्वन् ॥ ५२ ॥ जहतेतिभुजंगानांसर्पाणांपतिः शे ॥ ७ ॥

षस्तेनविरोधितांवैरवत्तांजहतासक्तवताकृतः अंजलिपुटोयेनसतथोक्तेनबद्धांजलिनेत्यर्थः नतेर्विनयस्य
विशेषआधिक्यंतेनन्नाजालिनाशोभमानेनधीमताबुद्धिमताविनतायाः आत्मजः पुत्रोगरुडस्तेनप्रतिवासरं
प्रत्यहंमहितः पूजितः हरितांदिशामीश्वरा अधिपतय इंद्रादयस्तैरर्थितोयाचितः पुराकिलतेनविष्णुनामात
लिप्रार्थितेनकुहितुर्गुणकेश्यः पत्युः कृतेपविसर्पस्यगरुडाद्भयदानेकृतेस्वविपक्षरक्षणात्क्षुभितंपक्षिरा
जंतत्क्रोधाहंत्वन्नोबलादनइतिगर्वितंस्ववामतर्जनीभारेणैवभंक्त्वाभगवान् विनिनायेतिमहाभारतीयक

अपराप्यतनेमनोरमेकृतकायाधवरक्षणोहरिः ॥ लपनेऽजिनयोमधीश्वरोनिवसत्यार्निहरोनरस्तनो ॥ ५४
असुरस्यपतिः पुनर्भवोर्दितिजन्माप्रतिचस्करेविनैः ॥ भुजमध्यविदारमंजसामहसायेनसदाभ्रभेदिना ॥ ५५

थात्रानुसंधेया ॥ ५३ ॥ अपराप्यतनइतिमनोरमेमनोहरे अपरायतने अपरस्मिन्मंडपेसोन्तरदिग्द्वारसूर्वं
भागेनिर्मितंयदायतनंमंदिरंतस्मिन् लपनेमुखे अजिनयोनयोमृगास्तेषामधीश्वरो अधिपतिः सिंहस्तदाकृ
तिरित्यर्थः तनौमूर्त्तौनरः पुरुषाकारः आर्त्तिहरोदुःखहर्त्ता कृतंकयाधोरपत्यस्यप्रह्लादस्यरक्षणंयेनसत
थोक्तः हरिः निवसति ॥ ५४ ॥ असुरस्यपतिरितिसटाः केसराणिताभिरभ्रंगगनंभिनत्तीतितेनतथोक्तेन

॥८॥ येननृहिंसेन कर्त्रा महसा प्रतापेन असुराणां स्थपतिरधिपतिः दितितनया दैत्यो हिरण्यकशिपुः त्रिंतेस्ती
क्ष्णैः पुनर्भवैर्नखैः भुजयोर्मध्यं वक्षः तद्विदार्येति भुजमध्यविदारम् परिशिक्षितरूपमानेचेतिणमुल् अंतसान्त
नायासेनप्रतिचस्कुरेद्दत्तः किरतेः कर्मणि लिट् कृच्छ्रसुतामितिगुणः हिंसायां प्रतेश्चेति सुडागमः ॥ २५ ॥ एक
स्मिन्निति दिग्भागाम्बौकिका निरंगाणामवयवास्तेषु स्थिता निखिलाः समग्राः क्रतवो यज्ञा यस्य सतथोक्तः
महान् आत्मा धैर्यं यस्य सतथोक्तः यद्वा स्वभक्तरूपदाने महात्मा उदारमनाः वराहः क्रोडरूपमूर्तिस्तु

एकस्मिन्वसति हरिर्वराहमूर्त्तिर्दिग्भागस्थितनिखिलक्रतुर्महात्मा॥ येनेलाविनुदरदां चलेविरेजेन्नीतां
नाचिवविधृता कलंकलेखा ॥ २६ ॥

येस्य सः हरिः मंदिरेइतिविशेषः एकस्मिन्मंडपस्योन्तरदिग्भागे
सप्तमभागेनिर्मितं यन्मंदिरं तस्मिन् वसतितिष्ठति सकथंभूतः येन वराहमूर्तिना हरिणा विदा
दाः॥ शुभ्रायेरदादंतास्तेषामंचलः॥ प्रांतभागो दंष्ट्रा तस्मिन् विधृताईलामही नीतां नीलोहिमदीधि
तौचंद्रे कलंकलेखा मृगलांछनराजिरिव विरेजे शुशुभे प्रहर्षेणीपद्यन्तमेतत्तल्लक्षणं तूक्तं प्राक् ॥ २६ ॥८॥

प्रसंगात्समासेनतच्चरित्रांतरमाह दैतेयमितिर्दृप्तोदैत्यपराभवविधौसमर्थः योवराहमूर्त्तिर्हरिः सकलाः
समग्रायेसुरासुरादेवदैत्यास्तैः जेतुमशक्यं दर्पगर्विष्टम् युध्यंतं स्वेनसह युद्धकारिणम् भूभारं क्षितिभार
रूपम् भयस्यविषयो गोचरोनभवती सभयविषयस्तम् भीतेरभूमिमित्यर्थः हिरण्यनेत्रं हिरण्याक्षम् दैते
यंदैत्यम् हरिमिंद्रः वज्रतः कुलिशेन गिरीन्द्रम् महान्तं शैलमिव निजमहसा स्वप्रतापेन सपदि द्रुतम् दंष्ट्रया द

दैतेयं सकलसुरासुरैरजेयं दृप्तं यो भयविषयं हिरण्यनेत्रम्॥ भूभारं हरिरिववज्रतोगिरींद्रं युध्यंतं सपदिददा
रदंष्ट्रयेवा ॥ २७ ॥ इतिश्रीहरिसंभवेमहाकाव्ये हर्षांकेश्रीमदचिंसानंदवर्णिकृते हरिप्रियसत्त्वाख्याद्विवर्णन
नामाष्टादशः सर्गः॥ १८ ॥

दारविदारितवान् ॥ २७ ॥ इतिश्रीपद्वाक्यप्रमाणपारावारीणधुरीणविश्वनाथ
भट्टात्मजदीनानाथत्रिविक्रमश्रीप्रत्यक्षवाक्यदेवश्रीसहजानंदस्वामिचरणकमलोपासकगोपालानंदमुमुक्षुः
प्रेरितमतिग्रामावटंकदयाशंकरात्मजश्रीहरिकृष्णैकभक्तभोलानाथकृतोश्रीहरिसंभवकाव्यस्य विद्वत्तत
कंठाभिरामसमाख्यायामष्टादशः सर्गः॥ १८ ॥ लि॰ रावलजेचामोरारजी सं॰ १९५६ फागणसुदी १३ मूमैयाए